नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

# १९ निरयावलिका-उपाङ्गसूत्रम्

सटीकं

## अष्टमं उपाङ्गम्

मूलसूत्रम् + चंद्रसूरिविरचिता वृत्ति

### अध्ययनं – १ कालं

**वृ.** नमः श्रीमुनिसुव्रतदेवाय ॥

॥ १ ॥ पार्श्वनाथं नमस्कृत्य, प्रायोऽन्यग्रन्थवीक्षिता ।
निरयावलिश्रुतस्कन्धे, व्याख्या काचित् प्रकाश्यते ।

तत्र निरयावलिकाख्योपाङ्गग्रन्थस्यार्थतो महावीरनिर्गतवचनमभिधित्सुरावचार्यः सुधर्मस्वामी सूत्रकारः ।

**मू.** *(१) नमः श्रुतदेवतायै ॥ ते णं काले णं ते णं समए णं रायगिहे नामं नयरे होत्था, रिद्ध, (उत्तरपुरिच्छिमे दिसीभाए) गुणसिलए, चेइए, वन्नओ, असोगवरपायवे पुढविसिलापट्टए*

**वृ.** 'ते णं काले णं' इत्यादिग्रन्थं तावदाह–अत्र 'णं' वाक्यालङ्कारार्थः । तस्मिन् काले–ऽवसर्पिण्याश्चतुर्थभागलक्षणे तस्मिन् समये–तद्विशेषरूपे यस्मिन् तन्नगरं राजगृहाख्यं राजा च श्रेणिकाख्यः सुधर्म (श्रीवर्धमान) स्वामी च 'होत्था'त्ति अभवत्–आसीदित्यर्थः । अवसर्पिणीत्वात्कालस्य वर्णकग्रन्थवर्णितविभूतियुक्तमिदानीं नास्ति । 'रिद्ध' इत्यनेन च नगरवर्णकः सूचितः, स च–"रिद्धत्थिमियसमिद्धं" भवनादिभिर्वृद्धिमुपगतं, भयवर्जितत्वेन स्थिरं, समृद्धं–धनधान्यादियुक्तं, ततः पदत्रयस्य कर्मधारयः ।

"पमुइयजणजाणवयं" प्रमुदिताः प्रमोदकारणवस्तूनां सद्भावात् जना–नगरवास्तव्यलोकाः जानपदाश्च–जनपदभवास्तत्रा यांताः सन्तो यस्मिन् तत् प्रमुदितजनजानपदम् ।" उत्ताणनयनपेच्छणिज्जं" सौभाग्यातिशयात् उत्तानैः अनिमिषैः नयनैः–लोचनैः प्रेक्षणीयं यत्तत्तथा "पासाइयं" चित्तप्रसत्तिकारि । "दरिसणिज्जं" यत् पश्यच्चक्षुः श्रमं न गच्छति । 'अभिरूवं' मनोज्ञरूपम् । "पडिरूवं" द्रष्टारं द्रष्टारं प्रति रूपं यस्य तत्तथेति ।

तस्मिन् "उत्तरपुरिच्छिमे दिसीभाए गुणसिलए नामं चेइए होत्था" चैत्यं–व्यन्तरायतनम् 'वन्नओ'त्ति चैत्यवर्णको वाच्यः–"चिराईए पुव्वपुरिसपन्नत्ते" चिरः–चिरकालः आदिः–निवेशो यस्य तत् चिरादिकम् अत एव पूर्वपुरुषैः–अतीतनरैः प्रज्ञप्तम्–उपादेयतया प्रकाशितं पूर्वपुरुषप्रज्ञप्तम् ।

"सच्छत्ते सज्झए सघंटे सपडागे कयवेयद्दीए" कृतवितर्दिकं–रचितवेदिकं

''लाउल्लोइयमहिए'' लाइयं–यद्भूमेश्छगणादिना उपलेपनम्, उल्लोइयं–कुड्यमालानां सेटिकादिभिः संमृष्टीकरणं, ततस्ताभ्यां महितमिव महितं पूजितं यत्तत्तथेति। तत्र च गुणशिलकचैत्ये अशोक- वरपादपः समस्ति, ''तस्स णं हेट्ठा खंधासन्ने, एत्थ णं महं एगे पुढविसिलापट्टए पन्नत्ते, विक्खंभाया-मसुप्पमाणे आईणगरूयबूरनवणीयतूलफासे'' आजिनकं–चर्ममयं वस्त्रं, रूतं–प्रतीतं, बूरो– वनस्पतिविशेषः, नवनीतं–प्रक्षणं, तूलम्–अर्कतूलं, तद्वत् स्पर्शो यस्य स तथा, कोऽर्थः ? कोमल- स्पर्शयुक्तः। 'पासाईए जाव पडिरूवे' त्ति।

***मू. (२) ते णं काले णं ते णं समए णं समणस्स भगवओ महावीरस्स अंतेवासी अज्जसुहम्मे नामं अनगारे जातिसंपन्ने जहा केसि जाव पंचहिं अनगारसएहिंसद्धिं संपरिवुडे पुव्वाणुपुव्विंचरमाणे जेणेव रायगिहे नगरे जाव अहापडिरूवं उग्गहं ओगिन्हित्ता संजमेणं जाव विहरति। परिसा निग्गया धम्मो कहिओ। परिसा पडिगया।***

**वृ.** 'ते णं काले णं' इत्यादि, 'जाइसंपन्ने' उत्तममातृकपक्षयुक्त इति बोद्धव्यम्, अन्यथा मातृकपक्षसंपन्नत्वं पुरुषमात्रस्यापि स्यात् इति नास्योत्कर्षः कश्चिदुक्तो भवेत्, उत्कर्षाभिधानार्थं चास्य विशेषणकलापोपादानं चिकीर्षितमिति। एवं ''कुलसंपन्ने,'' नवरं कुलं–पैतृकः पक्षः। ''बलसंपन्ने'' बलं–संहननविशेषसमुत्थः प्राणः। 'जहा केसि' त्ति केसि (शि) वर्णको वाच्यः, स च ''विनयसंपन्ने'' लाघवं द्रव्यतोऽल्पोपधित्वं भावतो गौरवत्रयत्यागः एभिः संपन्नो यः स तथा ''ओयंसी'' ओजो–मानसोऽवष्टम्भः तद्वान् ओजस्वी, तेजः–शरीरप्रभा तद्वान् तेजस्वी, वचो–वचनं सौभाग्याद्युपेतं यस्यास्तीति वचस्वी, ''जसंसी'' यशस्वी–ख्यातिमान्, इह विशेषणचतुष्टयेऽपि अनुस्वारः प्राकृत्वात्।

''जियकोहमानमायालोभे'' नवरं क्रोधादिजयः उदयप्राप्तक्रोधादिविफलीकरणतोऽवसेयः 'जीवियासामरणभयविप्पमुक्के' जीवितस्य–प्राणधारणस्य आशा–वाञ्छा मरणाच्च यद्भयं ताभ्यां विप्रमुक्तो जीविताशामरणभयविप्रमुक्तः तदुभयोपेक्षक इत्यर्थः। 'तवप्पहाणे' तपसा प्रधानः– उत्तमः शेषमुनिजनापेक्षया तपो वा प्रधानं यस्य स तपःप्रधानः। एवं गुणप्रधानोऽपि, नवरं गुणाः–संयमगुणाः। 'करणचरणप्पहाणे' चारित्रप्रधानः। 'निग्गहप्पहाणे' निग्रहो– अनाचार-प्रवृत्तेर्निषेधनम्।

'घोरबंभचेरवासी' घोरं च तत् ब्रह्मचर्यं च अल्पसत्त्वैर्दुःखेन यदनुचर्यते तस्मिन् घोरब्रह्मचर्यवासी। 'उच्छूढसरीरे' 'उच्छूढं' ति उज्झितमिव उज्झितं शरीरं तत्सत्कारं प्रति निःस्पृहत्वात् (येन) स तथा। 'चोद्दसपुव्वी चउनाणोवगए' चतुर्ज्ञानोपयोगतः–केवलवर्जज्ञान-युक्तः। केसि(शि)गणधरो मतिश्रुतावधिज्ञानत्रयोपेत इति दृश्यम्। आचार्यः सुधर्मा पञ्चभिरनगारशतैः सार्धं–सह संपरिवृतः समन्तात्परिकलितः पूर्वानुपूर्व्या न पश्चानुपूर्व्या चैकत्यर्थः क्रमेणेति हृदयं, चरन्–संचरन्। एतदेवाह–

'गामाणुगामं दुइज्जमाणे'' त्ति ग्रामानुग्रामश्च विवक्षितग्रामादनन्तरग्रामो ग्रामानुग्रामं तत् द्रवन्–गच्छन्–एकस्माद् ग्रामादनन्तरग्राममनुल्लङ्घयन्नित्यर्थः, अनेनाप्रतिबद्धं विहारमाह। तत्राप्यौत्सुक्याभावमाह–'सुहंसुहेणं विहरमाणे' सुखंसुखेन–शरीरखेदाभावेन संयमाऽऽबाधाभावेन च विहरन् ग्रामादिषु वा तिष्ठन्। 'जेणेव' त्ति यस्मिन्नेव देशे राजगृहं नगरं यस्मिन्नेव प्रदेशे गुणशिलकं चैत्यं तस्मिन्नेव प्रदेशे उपागच्छति, उपागत्य यथाप्रतिरूपं–यथोचितं मुनिजनस्य अवग्रहम्–

आवासम् अवगृह्य–अनुज्ञापनापूर्वकं गृहीत्वा संयमेन तपसा चात्मानं भावयन् विहरति–आस्तेस्म।

'परिसा निग्गय' त्ति परिषत्–श्रेणिकराजादिको लोकः निर्गता–निःसृता सुधर्मस्वामिवन्दनार्थम्। धर्मश्रवणानन्तरं "जामेव दिसिं पाउब्भूआ तामेव दिसिं पडिगय" त्ति यस्या दिशः सकाशात् प्रादुर्भूता–आगतेत्यर्थः तामेव दिशं प्रतिगता इति।

*मू. (३) तेणं काले णं तेणं समए णं अज्जसुहम्मस्स अनगारस्स अंतेवासी जंबू नामं अनगारे समचउरंससंठाणसंठिए जाव संखित्तविउलतेयलेस्से अज्जसुहम्मस्स अनगारस्स अदूरसामंते उड्ढंजाणू जाव विहरति।*

छा. तस्मिन् काले तस्मिन् समये आर्यसुधर्मणोऽन्तेवासी आर्यजम्बूनामाऽनगारः काश्यपगोत्रेण। 'सत्तुस्सेहे' सप्तहस्तोच्छ्रायः, 'समचउरंससंठाणसंठिए' यावत्करणादिदं दृश्यं 'वज्जरिसहनारायसंघयणे कणगपुलगनिघसपम्हगोरे' कनकस्य–सुवर्णनस्य 'पुलग' त्ति यः पुलको–लवः तस्य यो निकषः–कषपट्टरेखालक्षणः तथा 'पम्हेति' पद्मगर्भः तद्वद्यो गौरः स तथा, वृद्धव्याख्या तु–कनकस्य न लोहादेर्यः पुलकः–सारो वर्णातिशयः तदाधानो यो निकषो–रेखा तस्य यत् पक्ष्म–बहलत्वं तद्वद्यो गौरः स कनकपुलकनिकषपक्ष्मगौरः। तथा 'उग्गतवे' उग्रम्–अप्रधृष्यं तपोऽस्येति कृत्वा।

'तत्ततवे' तप्तं–तापितं तपो येन स तप्ततपाः एवं तेन तपस्तप्तं येन कर्माणि संताप्य तेन तपसा स्वात्माऽपि तपोरूपः संतापित इति। तथा दीप्तं तपो यस्य स दीप्ततपाः, दीप्तं तु–हुताशन इव ज्वलत्तेजः कर्वनदाहकत्वात्। 'उराले' उदारः–प्रधानः। 'घोरे' घोरः–निघृणः परीषहेन्द्रियकषायाख्यानां रिपूणां विनाशे कर्तव्ये। तथा 'घोरव्वए' घोराणि–अन्यैर्दुरनुचराणि व्रतानि यस्य स तथा। तथा घोरैस्तपोभिस्तपस्वी घोरतपस्वी। "संखित्तविउलतेयलेस्से" संक्षिप्ताशरीरान्तर्निलीना विपुला–अनेकयोजनप्रमाणक्षेत्राश्रितवस्तुदहनसमर्था तेजोलेश्या–विशिष्टतपो जन्यलब्धिविशेषप्रभावा तेजोलेश्या (यस्य सः) एवं गुणविशिष्टो जम्बूस्वामी भगवान् आर्यसुधर्मणः स्थविरस्य "अदूरसामंते" त्ति दूरं–विप्रकर्षः सामन्तं समीपम्, उभयोरभावोऽदूरसामन्तं (तस्मिन्) नातिदूरे नातिसमीपे उचिते देशे स्थित इत्यर्थः।

कथं ? 'उड्ढंजाणू' शुद्धपृथिव्यासनवर्जनात् औपग्रहिकनिषद्याभावाच्च उत्कटुकासनः सन्नपदिश्यते ऊर्ध्वे जानुनी यस्य स ऊर्ध्वजानुः, अधःशिराः अधोमुखः नोर्ध्वं तिर्यग्वा निक्षिप्तदृष्टिः, किं तु नियतभूभागनियमितदृष्टिरिति भावना। यावत्करणात् 'झाणकोट्ठोवगए' ध्यानमेव कोष्ठो ध्यानकोष्ठस्तमुपगतो ध्यानकोष्ठोपगतः, यथाहि–कोष्ठके धान्यं प्रक्षिप्तमविप्रकीर्णं भवति एवं स भगवान् धर्मध्यानकोष्ठमनुप्रविश्य इन्द्रियमनांस्यधिकृत्य संवृतात्मा भवतीति भावः। संयमेन–संवरेण तपसा ध्यानेन आत्मानं भावयन्–वासयन् विहरति–तिष्ठति।

*मू. (४) तए णं से भगवं जंबू जातसड्ढे जाव पज्जुवासमाणे एवं वयासि–उवंगाणं भंते! समणेणं जाव संपत्तेणं के अट्ठे पन्नत्ते ? एवं खलु जंबू! समणेणं भगवया जाव संपत्तेणं एवं उवंगाणं पंच वग्गा पन्नत्ता, तं जहा–निरयावलियाओ १ कप्पवडिंसियाओ २ पुप्फियाओ ३* पुप्फचूलियाओ ४ वण्हिदसाओ ५।

जइ णं भंते! समणेणं जाव संपत्तेणं उवंगाणं पंच वग्गा पन्नत्ता तं जहा–निरयावलियाओ जाव वण्हिदसाओ पढमस्स णं भंते वग्गस्स उवंगाणं निरयावलियाणं समणेणं भगवया जाव

संपत्तेणं कइ अज्झयणा पन्नत्ता ? एवं खलु जंबू ! समणेणं जाव संपत्तेणं उवंगाणं पढमस्स वग्गस्स निरयावलियाणं दस अज्झयणा पन्नत्ता, तं जहा—काले १ सुकाले २ महाकाले ३ कण्हे ४ सुकण्हे ५ तहा महाकण्हे ६ वीरकण्हे ७ य बोद्धव्वे रामकण्हे ८ तहेव य पिउसेणकण्हे ९ नवमे दसमे महासेणकण्हे १० उ।

वृ. 'तए णं से' इत्यादि, तत इत्यानन्तर्ये तस्माद् ध्यानादनन्तरं, णं इति वाक्यालङ्कारे, स आर्यजम्बूनवामा उत्तिष्ठतीति संबन्धः, किम्भूतः सन्नित्याह—'जायसड्ढे' इत्यादि जाता—प्रवृत्ता श्रद्धा—इच्छा यस्य प्रष्टुं स जातश्रद्धः, यद्वा जाता श्रद्धा—इच्छा वक्ष्यमाणवस्तुतत्त्वपरिज्ञानं प्रति यस्य स जातश्रद्धः। तथा जातः संशयोऽस्येति जातसंशयः, तथा जातकुतूहलः—जातौत्सुक्य इत्यर्थः विश्वस्यापि वस्तुव्यतिकरस्याङ्गेषु भणनादुपाङ्गेषु कोऽन्योऽर्थो भगवताऽभिहितो भविष्यति कथं च तमहमवभोत्स्ये ? इति 'उट्ठाए उट्ठेइ' उत्थानमुत्था—ऊर्ध्वं वर्तनं तया उत्तिष्ठति, उत्थाय च 'अजजसुहम्मं थेरं तिक्खुत्तो आयाहिणपयाहिणं करेइ' त्ति त्रिः कृ त्वः—त्रीन् वारान् आदक्षिण-प्रदक्षिणां—दक्षिणपार्श्वादारभ्य परिभ्रमणतः (पुनः) दक्षिणपार्श्वप्राप्तिः आदक्षिणप्रदक्षिणा तां करोति—विदधाति, कृत्वा च वन्दते—वाचा स्तौति, नमस्यति—कायेन प्रणमति, 'नच्चासन्ने नाइदूरे' उचिते देशे इत्यर्थः।

'सुस्सूसमाणे' श्रोतुमिच्छन्। 'नमंसमाणे' नमस्यन्—प्रणमन्। अभिमुखं 'पंजलिउडे' कृतप्राञ्जलिः। विनयेन उक्तलक्षणेन 'पज्जुवासमाणे' पर्युपासनां विदधान एवं इति वक्ष्यमाणप्रकारं 'वदासि' त्ति अवादीत्—भगवता उपाङ्गानां पञ्च वर्गाः प्रज्ञप्ताः, वर्गोऽध्ययनसमुदायः, तद्यथेत्यादिना पञ्चवर्गान् दर्शयति ''निरयावलियाओ कप्पवडिंसयाओ पुप्फियाओ पुप्फचूलियाओ वण्हिदसाओ'' त्ति प्रथमवर्गो दशाध्ययनात्मकः प्रज्ञप्तः।

अध्ययनदशकमेवाह—'काले सुकाले' इत्यादिना, मातृनामभिस्तदपत्यानां पुत्राणां नामानि, यथा काल्या अयमिति कालःकुमारः, एवं सुकाल्याः माहाकाल्याःकृष्णायाः सुकृष्णायाः महाकृष्णायाः वीरकृष्णायाः रामकृष्णायाः पितृसेनकृष्णायाः महासेनकृष्णायाः अयमित्येवं पुत्रनाम वाच्यम्। इह काल्या अपत्यमित्याद्यर्थे प्रत्ययो नोत्पाद्यः, काल्यादिशब्देष्वपत्येऽर्थे एयण् प्राप्तया कालसुकालादिनामसिद्धेः, एवं चाद्यः कालः १, तदनु सुकालः २, महाकालः ३, कृष्णः ४, सुकृष्णः ५, महाकृष्णः ६, वीरकृष्णः ७, रामकृष्णः ८, पितृसेनकृष्णः ९, महासेनकृष्णः १० दशमः।

इत्येवं दशाध्ययनानि निरयावलिकानामके प्रथमवर्गे इति ॥

*मू. (५) जइ णं भंते ! समणेणं जावसंपत्तेणं उवंगाणं पढमस्स० निरयावलियाणं दस अज्झयणा पन्नत्ता, पढमस्स णं भंते ! अज्झयणस्स निरयावलियाणं समणेणं जाव संपत्तेणं के अट्ठे पन्नत्ते ? एवं खलु जंबू !*

*ते णं काले णं ते णं समए णं इहेव जंबुद्दीवे दीवे भारहे वासे चंपा नामं नयरी होत्था, रिद्ध, पुन्नभद्दे चेइए, तत्थ णं चंपाए नयरीए सेणियस्स रन्नो पुत्ते चेल्लणाए देवीअत्तए कूणिए नामं राया होत्था, महता, तस्स णं कूणियस्स रन्नो पउमावई नामं देवी होत्था, सोमाल जाव विहरइ। तत्थ णं चंपाए नयरीए सेणियस्स रन्नो भज्जा कूणियस्स रन्नो चुल्लमाउया काली नामं देवी होत्था, सोमाल जाव सुरूवा।*

वृ. 'एवं खलु जंबू ते णं काले ण' मित्यादि, 'इहेव' त्ति इहैव देशतः प्रत्यक्षासन्ने न पुनर-

सङ्ख्येयत्वाज्जम्बूद्वीपानामन्यत्रेतिभावः । भारते वर्षे–क्षेत्रे चम्पा एषा नगरी अभूत् । रिद्धेत्यनेन 'रिद्धत्थिमियसमिद्धे'त्यादि दृश्यं, व्याख्या तु प्राग्वत् । तत्रोत्तरपूर्वदिग्भागे पूर्णभद्रनामकं चैत्यं व्यन्तरायतनम् ।

'कुणिए नामं राय' त्ति कूणिकनामा श्रेणिकराजपुत्रो राजा 'होत्थ' त्ति अभवत् । तद्वर्णको "महयाहिमवंतमहंतमलयमंदरमहिंदसारेत्यादि पसंतडिंबडमरं रज्जं पसाहेमाणे विहरइ" इत्येतदन्तः, तत्र महाहिमवानिव महान् शेषराजपेक्षया, तथा मलयः–पर्वतविशेषो, मन्दरो–मेरुः, महेन्द्रः-शक्रादिदेवराजः, तद्वत्सारः–प्राधानो यः स तथा । तथा प्रशान्तानि डिम्बानि–विघ्ना डमराणि च–राजकुमारादिकृता विड्वरा यस्मिंस्तत्तथा (राज्यं) प्रसाधयन्–पालयन् विहरतिआस्ते स्म । कूणिकदेव्याः पद्मावतीनाम्न्या वर्णको यथा–'सोमाल जाव विहरइ' यावत्करणादेवं दृश्यम् "सुकुमालपाणिपाया अहीणपंचिंदियसरीरा" अहीनानि–अन्यूनानि लक्षणतः स्वरूपतो वा पञ्चापीन्द्रियाणि यस्मिंस्तत् तथाविधं शरीरं यस्याः सा तथा ।

"लक्खणवंजणगुणोववेया" लक्षणानि–स्वस्तिकचक्रादीनि व्यञ्जनानि–मषीतिलकादीनि तेषां यो गुणः–प्रशस्तता तेन उपपेता–युक्ता या सा तथा, उप अप इता इतिशब्दत्रयस्य स्थाने शकन्ध्वादिदर्शनात् उपपेतेति स्यात् । "माणुम्माणप्पमाणपडिपुन्नसुजायसव्वंगसुंदरंगी" तत्र मानं–जलद्रोमप्रमाणता, कथं ? जलस्यातिभृते कुण्डे पुरुषे निवेशिते यज्जलं निःसरति तद्यदि द्रोणमानं भवति तदा स पुरुषो मानप्राप्त उच्यते, तथा उन्मानम्–अर्धभारप्रमाणता, कथं ? तुलारोपितः पुरुषो यद्यर्धभारं तुलयति तदा स उन्मानप्राप्त उच्यते, प्रमाणं तु स्वाङ्गुलेनाष्टोत्तर-शतोच्छ्रायिता, ततश्च मानोन्मानप्रमाणैः प्रतिपूर्णानि–अन्यूनानि सुजातानि सर्वाणि अङ्गानि–शिरःप्रभृतीनि यस्मिंस्तत् तथाविधं सुन्दरम् अङ्ग–शरीरं यस्याः सा तथा । "ससिसोमाकार-कंतपियदंसणा" शशिवत्सौम्याकारं कान्तं च–कमनीयम् अत एव प्रियं द्रष्टृणां दर्शनं–रूपं यस्याः सा तथा ।

अत एव सुरूपा स्वरूपतः सा पद्मावती देवी 'कुणिएण सद्धिं उरालाइं भोगभोगाइं भुंजमाणी विहरइ' भोगभोगान्–अतिशयवद्भोगान् । 'तत्थ णं' इत्यादि । 'सोमालपाणिपाया' इत्यादि पूर्ववद्वाच्यम् । अन्यच्च "कोमुइरयणियरविमलपडिपुन्नसोमवयणा" कौमुदीरजनीकरवत्–कार्तिकीचन्द्र इव विमलं प्रतिपूर्णं सौम्यं च वदनं यस्याः सा तथा । 'कुंडलुल्लिहियगंडलेहा' कुण्डलाभ्यामुल्लिखिता–घृष्टा गण्डलेखा–कपोलविरचितमृगमदादिरेखा यस्याः सा तथा । 'सिंगारागारचारुवेसा' शृङ्गारस्य–रसविशेषस्य अगारमिव अगारं तथा चारुः वेषो–नेपथ्यं यस्याः सा तथा ततः कर्मधारयः ।

'काली नामं देवी' श्रेणिकस्य भार्या कूणिकस्य राज्ञश्चुल्लजननी–लघुतमाताऽभवत् । सा च काली "सेणियस्स रन्नो इट्ठा" वल्लभा कान्ता काम्यत्वात् 'पिया' सदा प्रेमविषयत्वात्, 'मणुन्ना' सुन्दरत्वात् 'नामधिज्जा' प्रशस्तनामध्यवतीत्यर्थः नाम वा धार्यं–हृदि धरणीयं यस्याः सा तथा, 'वेसासिया' विश्वसनीयत्वात् 'सम्मया' तत्कृतकार्यस्य संमतत्वात् 'बहुमता' बहुशो बहुभ्यो वाऽन्येभ्यः सकाशात् बहुमता बहुमानपात्रं वा, 'अणुमया' विप्रियकरणस्यापि पश्चात्मताऽनुमता । भंडकरंडकसमाणा' आभरणकरण्डकसमाना उपादेयत्वात् सुरक्षितत्वाच्च । 'तेल्लकेला इव सुसंगोविया' तैलकेला सौराष्ट्रप्रसिद्धो मृन्मयस्तैलस्य भाजनविशेषः, स च भङ्गभयात् लोचनभयाच्च

सुष्ठु सङ्क्षोप्यते, एवं साऽपि तथोच्यते। 'चोलापेडा इव सुसंपरिग्गहिया' वस्त्रमञ्जूषेवेत्यर्थः। 'सा काली देवी सेणिएण रन्ना सद्धिं विउलाइं भोगभोगाइं भुंजमाणा विहरइ'।

*मू. (६) तीसे णं कालीए देवीए पुत्ते काले नामं कुमारे होत्था, सोमाल जाव सुरूवे तते णं से काले कुमारे अन्नया कयाइ तिहिं दंतीसहस्सेहिं तिहिं रहसहस्सेहिं तिहिं आससहस्सेहिं तिहिं मणुयकोडीहिं गरुलवूहे। एक्कारसमेणं खंडेणं कूणिएणं रन्ना सद्धिं रहमुसलं संगामं ओयाए।*

**वृ.** कालनामा च तत्पुत्रः 'सोमालपाणिपाए' इत्यादि प्रागुक्तवर्णकोपेतो वाच्यः, यावत् 'पासाइए दरिसणिज्जे अभिरूवे पडिरूवे' इति पर्यन्तः। सेणियस्स रन्ने दुवे रयणा अट्ठारसवंको हारो १ सेयणगे हत्थीए २। तत्थ किर सेणियस्स रन्नो जावइयं रज्जस्स मुल्लं तावइयं देवदिन्नहारस्स सेयणगसस्स य गंधहत्थिस्स। तत्थ हारस्स उप्पत्ती पत्थावे कहिज्जिस्सइ। कूणियस्स य एत्थेव उप्पत्ती वित्थरेण भणिस्सइ, तत्कार्येण कालादीनां मरणसंभवात् आरम्भसङ्ग्रामतो नरकयोग्यकर्मोपचयविधानात्। नवरं कूणिकस्तदा कालादिदशकुमारान्वितश्चम्पायां राज्यं चकारस सर्वेऽपि च ते दोगुन्दुगदेवा इव कामभोगपरायणास्त्रयस्त्रिंशाख्या देवाः फुट्टमाणेहिं मुइंगमत्थएहिं वरतरुणिसंपिणिहिएहिं बत्तीसइपत्तनिबद्धेहिं नाडएहिं उवगिज्जमाणा भोगभोगाइं भुंजमाणा विहरंति। हल्लविहल्लनामाणो कूणियस्स चिल्लणादेवीअंगजाया दो भायरा अन्नेऽवि अत्थि। अहुणा आहरस्स उप्पत्ती भन्नइ–इत्थ सक्को सेणियस्स भगवंतं पइ निच्चलभत्तिस्स पसंसं करेइ।

तओ सेडुयस्स जीवदेवो तब्भत्तिरंजिओ सेणियस्स तुट्ठो संतो अट्ठारसवंकं हारं देइ, दोन्नि य वट्टगोलके देइ। सेणिएणं सो हारो चेल्लणाए दिन्नो पिय त्ति काउं, वट्टदुगं सुनंदाए अभयमंतिजननीए ताए रुट्ठाए किं अहं चेडरूवं ति काऊण अच्छोडिया भग्गा, तत्थ एगम्मि कुंडलजुयलं एगम्मि वत्थजुयलं तुट्ठाए गहियाणि। अन्नाया अभओ सामिं पुच्छइ–'को अपच्छिमो रायरिसि' त्ति। सामिणा उद्दायिणो वागरिओ, अओ परं बद्धमउडा न पव्वयंति। ताहे अभएण रज्जं दिज्जमाणं न इच्छियं ति पच्छा सेणिओ चिंतेइ 'कोणियस्स दिज्जिहि' त्ति हल्लस्स हत्थी दिन्नो सेयणगो विहल्लस्स देवदिन्नो हारो, अभएण वि पव्वयंतेण सुनंदाए खोमजुयलं कुंडलजुयलं च हल्लविहल्लाणं दिन्नाणि। महया विहवेण अभओ नियजननीसमेओ पव्वइओ। सेणियस्स चेलणादेवीअंगसमुब्भूया तिन्नि पुत्ता कूणओ हल्लविहल्ला य। कूणियस्स उप्पत्ती एत्थेव भणिस्सइ।

कालीमहाकालीपभुहदेवीणं अन्नासिं तणया सेणियस्स बहवे पुत्ता कालपमुहा संति। अभयम्मि गहियव्वए अन्नया कोणिओ कालाईहिं दसहिं कुमारेहिं समं मंतेइ–'सेणियं सेच्चाविग्घकारयं बंधित्ता एक्कारसभाए रज्जं करेमो' त्ति, तेहिं पडिस्सुयं, सेणिओ बद्धो, पुव्वन्हे अवरन्हे य कससयं दवावेइ सेणियस्स कूणिओ पुव्वभवे वेरियत्तणेण चेल्लणाए कयाइ भोयं न देइ भत्तं वारियं पाणियं न देइ। ताहे चेल्लणा कहऽवि कुम्मासे वालेहिं बंधित्ति सयारंवसुरं पवेसेइ सा किर धोव्वइ सयवारे सुरा पाणियं सव्वं होइ, तीए पहावेण सो वेयणं न वेएइ। अन्नया तस्स पउमावईदेवीए पुत्तो एवं पिओ अत्थि, मायाए सो भणिओ–"दुरात्मन्! तव अंगुली किमिए वमंती पिया मुहे काऊण अत्थियाओ, इयरहा, तुमं रोवंतो चेव चिट्ठेसु"। ताहे चित्तं मणागुवसंतं जायं मए पिया एवं वसणं पाविओ, तस्स अधिई जाया, भुंजंतओ चेव उट्ठाय परसुहत्थगओ, अन्ने भणंति लोहदंडं गहाय, 'नियलाणि भंजामि' त्ति पहाविओ। रक्खवालगो नेहेण भणइ–'एसो सो पावो लोहदंडं परसुं वा गहाय एइ' त्ति।

सेणिएण चिंतियं–'न नज्जइ केण कुमारेण मारेहि ?' । तउ तालपुडगं विसं खइयं । जाव एइ ताव मओ । सुट्ठुयरं अधिई जाया । ताहे मयकिच्चं काऊण घरमागओ रज्जधुरामुक्कतत्तीओ तं चेव चिंतंतो अच्छइ । एवं कालेण विसोगो जाओ । पुनरवि सयनआसणाईए पिइसंतिए दट्ठूण अधिई होइ । तउ रायगिहाओ निग्गंतु चंपं रायहाणिं करेइ । एवं चंपाए कूणिओ राया रज्जं करेइ नियगमभायपमुहसयणसंजोगओ । इह निरयावलियासुयखंधे कूणिकवक्तव्यता आदावुल्लिखिता तत्साहाय्यकरणप्रवृत्तानां कालादीनां कुमाराणां दशानामपि सङ्ग्रामे रथमुशलाख्ये प्रभूतजनक्षयकरणेन नरकयोग्यकर्मोपार्जनसंपादनाद्नरकगामितया 'निरयाउ'त्ति प्रथमाध्ययनस्य कालादिकुमारवक्तव्यताप्रतिबद्धस्य एतन्नाम । अथ रथमुशलाख्यसङ्ग्रामस्योत्पत्तौ किं निबन्धनम् । अत्रोच्यते–एवं किलायं सङ्ग्रामः संजातः–चम्पायां कूणिको राजा राज्यं चकार ।

तस्य चानुजौ हल्लविहल्लाभिधानौ भ्रातरौ पितृदत्तसेचनकाभिधाने गन्धहस्तिनि समारूढौ दिव्यकुण्डलदिव्यवसनदिव्यहारविभूषितौ विलसन्तौ दृष्ट्वा पद्मावत्यभिधाना कूणिकराजस्य भार्या कदाचिद्दन्तिनोऽपहाराय तं कूणिकराजं प्रेरितवती–"कर्णविषलग्नकृतोऽतोऽयमेव कुमारो राजा तत्त्वतः, न त्वं, यस्येदशा विलासाः" । प्रज्ञाप्यमानाऽपि सा न कथञ्चिदस्यार्थ-स्योपरमति, तत्प्रेरितकूणिकराजेन तौ याचितौ । तौ च तद्भयाद्वैशाल्यां नगर्यां स्वकीयमातामहस्य चेटकाभिधानस्य राज्ञोऽन्तिके सहस्तिकौ सान्तः पुरपरिवारितौ गतवन्तौ । कूणिकेन च दूतप्रेषणेन तौ याचितौ । न च तेन प्रेषितौ, कूणिकस्य तयोश्च तुल्यमातृकत्वात् ।

ततः कूणिकेन भणितं–'यदि न प्रेषयसि तदा युद्धसज्जो भव' । तेनापि भणितम्–'एष सज्जोऽस्मि' । ततः कूणिकेन सह कालादयो दश स्वीया भिन्नमातृका भ्रातरो राजानश्चेटकेन सह सङ्ग्रामाय याताः । तत्रैकैकस्य त्रीणि त्रीणि हस्तिनां सहाणि, एवं रथानामश्वानां च, मनुष्याणां च प्रत्येकं तिस्रस्तिस्रः, कोट्यः । कूणिकस्याप्येवमेव । तत्र एकादशभागीकृतराज्यस्य कूणिकस्य काला-दिभिः सह निजेन एकादशांशेन सङ्ग्रामे काल उपगतः एतमर्थं वक्तुमाह–'तए णं से काले' इत्या-दिना । एनं च व्यतिकरं ज्ञात्वा चेटकेनाप्यष्टादश गणराजानौ मेलिताः, तेषां चेटकस्य च प्रत्येकमेवमेव हस्त्यादिबलपरिमाणं, ततो युद्धं संप्रलग्नम् । चेटकराजस्य तु प्रतिपन्नव्रतत्वेन दिनमध्ये एकमेव शरं मुञ्चति अमोघबाणश्च सः । तत्र च कूणिकसैन्ये गरुडव्यूहः चेटकसैन्ये (च) सागरव्यूहो विरचितः

ततश्च कूणिकस्य कालो दण्डनायको निजबलान्वितो युध्यमानस्तावद्गतो यावच्चेटकः, ततस्तेन एकशरनिर्घातेनासौ निपातितः १ । भग्नं च कूणिकबलम्, गते च द्वे अपि बले निजं निजमावासस्थानम् । द्वितीयेऽह्नि सुकालो नाम दण्डनायको निजबलान्वितो युध्यमानस्तावद्गतो यावच्चेटकः, एवं सोऽप्येकं निपातितः २ । एवं तृतीयेऽह्नि महाकालः, सोऽप्येवम् ३ । चतुर्थेऽह्नि कृष्णकुमारस्तथैव ४, पञ्चमे सुकृष्णः ५, षष्ठे महाकृष्णः ६, सप्तमे वीरकृष्णः ७, अष्टमे रामकृष्णः ८, नवमे पितृसेनकृष्णः ९ दशमे पितृमहासेनकृष्णः १० चेटकेनैकैकशरेण निपातिताः । एवं दशसु दिवसेषु चेटकेन विनाशिता दशापि कालादयः । एकादशे तु दिवसे चेटकजयार्थं देवताराधनाय कूणिकोऽष्टमभक्तं प्रजग्राह । ततः शक्र चमरावागतौ । ततः शक्रो बभाषे–"चेटकः श्रावक इत्यहं न तं प्रति प्रहरामि, नवरं भवन्तं संरक्षामि" । ततोऽसौ तद्रक्षार्थं वज्रप्रतिरूपकमभेद्यकवचं कृतवान् ।

चमरस्तु द्वौ सङ्ग्रामौ विकुर्वितवान् महाशिलाकण्टकं रथमुशलं चेति। तत्र महाशिलेव कण्टको जीवितभेदकत्वान्महाशिलाकण्टकः। ततश्च यत्र तृणशूकादिनाऽप्यभिहतस्याश्व-हस्त्यादेर्महाशिलाकण्टकेनेवास्याहतस्य वेदना जायते, स सङ्ग्रामो महाशिलाकण्टक एवोच्यते। 'रहमुसले' त्ति यत्र रथो मुशलेन युक्तः परिधावन् महाजनक्षयं कृतवान् अतो रथमुशलः। 'ओयाए' त्ति उपयातः—संप्राप्तः।

**मू. (७)** *ततेणं तीसे कालीए देवीए अन्नदा कदाइ कुडुंबजागरियं जागरमाणए अयमेयारूवे अज्झत्थिए जाव समुप्पज्जित्था—एवं खलु ममं पुत्ते कालकुमारे तिहिं दंतिसहस्सेहिं जाव ओयाए से मन्ने किं जतिस्सति ? नो जतिस्सति ? जीविस्सइ ? नो जीविस्सति ? पराजिणिस्सइ ? नो पराजिणिस्सइ ? काले णं कुमारे णं अहं जीवमाणं पासिज्जा ? ओहयमण जाव झियाइ। ते णं काले णं ते णं समए णं समणे भगवं महावीरे समोसरिते। परिसा निग्गया। तते णं तीसे कालीए देवीए कहाए लद्धट्ठाए समाणीए अयमेतारूवे अज्झत्थिए जाव समुप्पज्जित्था—एवं खलु समणे भगवं० पुव्वाणुपुव्विं इहमागते जाव विहरति। तं महाफलं खलु तहारूवाणं जाव विउलस्स अट्ठस्स गहणताए, तं गच्छामि णं समणं जाव पज्जुवासामि। इमं च णं एयारूवं वागरणं पुच्छिस्सामि त्तिकट्टु एवं संपेहेइ संपेहित्ता कोडुंबिय पुरिसे सद्दावेति २ त्ता वदासि खिप्पामेव भो देवाणुप्पिया! धम्मियं जाणप्पवरं जुत्तमेव उवट्ठवेह, उवट्ठवित्ता जाव पच्चप्पिणंति।*

*ततेणं सा काली देवी ण्हाया कयबलिकम्मा जाव अप्पमहग्घाभरणालंकियसरीरा बहूहिं खुज्जाहिं जाव महत्तरगविंदपरिक्खित्ता अंतेउराओ निग्गच्छइ, निग्गच्छित्ता जेणेव बाहिरिया उवट्ठाणसाला जेणेव धम्मिए जाणप्पवरे तेणेव उवागच्छइ, धम्मियं जाणप्पवरं दुरुहति २ नियगपरियालसंपरिवुडा चंपं नयरी मज्झं मज्झेणं निग्गच्छति २ जेणेव पुन्नभद्दे चेइए तेणेव उवागच्छइ २ छत्तादीए जावि धम्मियं जाणप्पवरं ठवेति २ धम्मियाओ जाणप्पवराओ पच्चोरुहति २ बहूहिं जाव खुज्जाहिं विंदपरिक्खित्ता जेणेव समणे भगवं [महावीरे] तेणेव उवागच्छति २ समणं भगवं [महावीरं] तिखुत्तो वंदति ७ ठिया चेव सपरिवारा सुस्सूसमाणा नमंसमाणा अभिमुहा विनएणं पंजलिउडा पज्जुवासति।*

*ततेणं समणे भगवं जाव कालीए देवीए तीसे य महतिमहालियाए धम्मकहा भाणियव्वा जाव समणोवासए वा समणोवासिया वा विहरमाणा आणाए आराहए भवति। ततेणं सा काली देवी समणस्स भगवओ अंतियं धम्मं सोच्चा निसम्म जाव हियया समणं भगवं तिखुत्तो जाव एवं वदासि—एवं खलु भंते मम पुत्ते काले कुमारे तहिं दंतिसहस्सेहिं जाव रहजाव हियया समणं भगवं तिखुत्तो जाव एवं वदासी—एवं खलु भंते मम पुत्ते काले कुमारे तिहिं दंतिसहस्सेहिं जाव रहमुसलसंगामं ओयाते।*

*से णं भंते किं जइस्सति ? नो जइस्सति ? जाव काले णं कुमारे अहं जीवमाणं पासिज्जा ? कालीति समणे भगवं कालिं देविं एवं वयासी—एवं खलु काली ! तव पुत्ते काले कुमारे तिहिं दंतिसहस्सेहिं जाव कूणिएणं रन्ना सद्धिं रहमुसलं संगामं संगामेमाणे हयमहियपवरवीरघाति-तनिवडितचिंधज्झयपडागे निरालोयातो दिसातो करेमाणे चेडगस्स रन्नो सपक्खं सपडिदिसिं रहेणं पडिरहं हव्वमागते। ततेणं से चेडए राया कालं कुमारं एज्जमाणं पासति, कालं एज्जमाणं पासित्ता आसुरुत्ते जाव मिसिमिसेमाणे धनुं परामुसति २ उसुं परामुसइ २ वइसाहं ठाणं ठाति २*

*आययकण्णायतं उसुं करेति २ कालं कुमारं एगाहच्चं कूडाहच्चं जीवियाओ ववरोवेति*

*तं कालगते णं काली ! काले कुमारे नो चेव णं तुमं कालं कुमारं जीवमाणं पासिहिसि ।*

*ततेणं सा काली देवी समणस्स भगवओ अंतियं एयमट्ठं सोच्चा निसम्म महया पुत्तसोहएणं अप्फुन्ना समाणी परसुनियत्तविव चंपगलता धस त्ति धरणीतलंसि सव्वंगेहिं संनिवडिया । ततेणं सा काली देवी मुहुत्तंतरेणं आसत्था समाणी उट्ठाए उट्ठेति उट्ठित्ता समणं भगवं [महावीरं] वंदइ नमंसइ २ एवं वयासी–एवमेयं भंते ! तहमेयं भंते ! अवितहमेयं भंते ! असंदिद्धमेयं भंते ! सच्चेणं एसमट्ठे से जहेतं तुब्भे वदह त्तिकट्टु समणं भगवं वंदइ नमंसइ २, तमेव धम्मियं जाणप्पवरं दुरुहति२ जामेव दिसं पाउब्भूया तामेव दिसं पडिगता ।*

**वृ.** 'किं जइस्सइ' त्ति जयश्लाघां प्राप्स्यति । परा जेष्यते–अभिभविष्यति परसैन्यं परानभिभविष्यति उत नेति कालनामानं पुत्रं जीवन्तं द्रक्ष्याम्यहं न वेत्येवम् उपहतो मनःसंकल्पो युक्तायुक्तविवेचनं यस्याः सा उपहतमनःसंकल्पा । यावत्करणात् ''करयलपल्हत्थियमुही अट्टज्झाणोवगया ओमंथियवयणनयणकमला'' ओमंथियं–अधोमुखीकृतं वदनं च नयनकमले च यया सा तथा । 'दीनविवन्नवयणा' दीनस्येवं विवर्णं वदनं यस्याः सा तथा । 'झियाइ'त्ति आर्तध्यानं ध्यायति, 'मनोमानसिएणं दुक्खेणं अभिभूया' मनसि जातं मानसिकं मनस्येव यद्वर्तते मानसिकं दुःखं वचनेनाप्रकाशितत्वात् तन्मनोमानसिकं तेन अबहिर्वर्तिनाऽभिभूता ।

'ते णं काले णं' इत्यादि । 'अयमेयारूवे'त्ति अयमेतद्रूपो वक्ष्यमाणरूपः 'अज्झत्थिए'त्ति आध्यात्मिकः–आत्मविषयः चिन्तितः–स्मरणरूपः, प्रार्थितः–लब्धुमाशंसितः, मनोगतः–मनस्येव वर्तते यो न बहिः प्रकाशितः, संकल्पो–विकल्पः, समुत्पन्नः–प्रादुर्भूतः । तमेवाह– 'एवमि'त्यादि यावत्करणात् ''पुव्वाणुपुव्विं चरमाणे गामाणुगामं दुइज्जमाणे इहमागए इह संपत्ते इह समोसढे, इहेव चंपाए नयरीए पुन्नभद्दे चेइए अहापडिरूवं उग्गहं उग्गिण्हित्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरइ'' ।

'तं महाफलं खलु' भो देवाणुप्पिया ! 'तहारूवाणं' अरहंताणं, भगवंताणं, नामगोयस्स वि सवणयाए, किमंग पुण अभिगमनवंदनमंसणपडिपुच्छणपज्जुवासणाए ! एगस्स वि आरियस्स धम्मियस्स वयणस्स सवणयाए, किमंग पुण 'विउलस्स अट्ठस्स गहणयाए' गच्छामि णं' अहं 'समणं' भगवं महावीरं वंदामि नमंसामि सक्कारेमि सम्माणेमि कल्लाणं मंगलं देवयं चेइयं 'पज्जुवासामि,' एवं नो पेच्चभवे हियाए सुहाए खमाए निस्सेयसाए आणुगामियत्ताए भविस्सइ 'इमं च णं एयारूवं वागरणं पुच्छिस्सामि त्तिकट्टु एवं संपेहेति' संप्रेक्षते–पर्यालोचयति, सुगमम्, नवरं 'इहमागए' त्ति चम्पायां, 'इह संपत्ते' त्ति पूर्णभद्रे चैत्ये, 'इह समोसढे' त्ति साधुतावग्रहे, एतदेवाह–इहेव चंपाए इत्यादि । 'अहापडिरूवं' ति यथाप्रतिरूपम् उचितमित्यर्थः ।

'तं' इति तस्मात्, 'महाफलं' ति महत्फलमायत्यां भवतीति गम्यं, 'तहारूवणं' ति तत्प्रकारस्वभावानां–महाफलजननस्वभावानामित्यर्थः । 'नामगोयस्स' त्ति नाम्नो–यादृच्छिकस्याभिधानस्य, गोत्रस्य–गुणनिष्पन्नस्य 'सवणयाए'त्ति श्रवणेन, 'किमंग पुण'त्ति किंपुनरिति पूर्वोक्तार्थस्य विशेषद्योतनार्थम् अङ्गेत्यामन्त्रणे, यद्वा परिपूर्ण एवायं शब्दो विशेषणार्थः, अभिगमनं, वन्दनं–स्तुतिः, नमनं–प्रणमनं, प्रतिपृच्छनं–शरीरादिवार्ताप्रश्नं, पर्युपासनं–सेवा, तद्भावस्तत्ता तया, एकस्यापि आर्यस्य आर्यप्रणेतृकत्वात्, धार्मिकस्य धर्मप्रतिबद्धत्वात्, वन्दामि–वन्दे, स्तौमि,

नमस्यामि–प्रणमामि, सत्कारयामि–आदरं करोमि वस्त्राद्यर्चनं वा, सन्मानयामि उचितप्रतिपत्त्येति कल्याणं–कल्याणहेतुं, मङ्गलं दुरितोपशमनहेतुं, देवं चैत्यमिव चैत्यं, पर्युपासयामि–सेवे, एतत्, नोऽस्माकं, प्रेत्यभवे–जन्मान्तरे, हिताय पथ्यान्नवत्, सुखाय–शर्मणे, क्षमाय–सङ्गतत्वाय, निःश्रेयसाय–मोक्षाय आनुगामिकत्वाय–भवपरम्परासु आनुबन्धसुखाय, भविष्यति, इति कृत्वा–इति हेतोः, संपेक्षते पर्यालोचयति, संप्रेक्ष्य चैवमवादीत्–शीघ्रमेव 'भो देवाणुप्पिया' ! धर्माय नियुक्तं धार्मिकं, यानप्रवरं, -

- 'चाउग्घंटं आसरहं' ति चतो घण्टा; पृष्ठतोऽग्रतः पार्श्वतश्च लम्बमाना यस्य स चतुर्घण्टः, अश्वयुक्तो रथोऽश्वरथस्तमश्वरथं, युक्तमेवाश्वादिभिः, उपस्थापयत–प्रगुणीकुरुत, प्रगुणीकृत्य मम समर्पयत। 'ण्हाय' त्ति कृतमज्जना, स्नानानन्तरं 'कयबलिकम्म' त्ति स्वगृहे देवतानां कृतबलिकर्मा, 'कयकोउयमंगलपायच्छित्त' त्ति कृतानि कौतुकमङ्गलान्येव प्रायश्चित्तानीव दुःस्वप्नादिव्यपोहायावश्यंकर्तव्यत्वात् प्रायश्चितानि यया सा तथा।

तत्र कौतुकानि–मषीपुण्ड्रादीनि, मङ्गलादीनि सिद्धार्थदध्यक्षतदूर्वाङ्कुरादीनि, 'सुद्धप्पावेसाइं वत्थाइं परिहिया' 'अप्पमहग्घाभरणालंकियसरीरा' (इति) सुगमम्, 'बहूहिं खुज्जाहिं जावे' त्यादि, तत्र कुब्जिकाभिः–वक्रजङ्घाभिः, चिलातीभिः–अनार्यदेशोत्पन्नाभिः, वामनाभिः–ह्रस्वशरीराभिः, वटभाभिः–मडहकोष्ठाभिः, बर्बरीभिः–बर्बरदेशसंभवाभिः, बकुशिकाभिः यौनकाभिः पण्हकाभिः इसिनिकाभिः वासिनिकाभिः लासिकाभिः लकुसिकाभिः द्रविडीभिः सिंहलीभिः आरबीभिः पक्कणीभिः बहुलीभिः मुसण्डीभिः शबरीभिः पारसीभिः नानादेशाभिः–बहुविधानार्यदेशोत्पन्नाभिरित्यर्थः, विदेशस्तदीयदेशापेक्षया चम्पानगरी विदेशः तस्य परिमण्डिकाभिः, 'इंगियचिंतियपत्थियवियाणियाहिं' तत्र इङ्गितेन–नयनादिचेष्टाविशेषेण चिन्तितं च–परेण हृदि स्थापितं प्रार्थितं च–अभिलषितं च विजानन्ति यास्तास्तथा ताभिः, स्वस्वदेशे यत्रेपथ्यं परिधानादिरचना तद्वद्गृहीतो वेषो यकाभिस्तस्तथा ताभिः, निपुणनामधेयकुशला यास्तास्तथा ताभिः, अत एव विनीताभिः युक्तेति गम्यते, तथा चेटिकाचक्रवालेन अर्थात् स्वदेशसंभवेन वृन्देन परिक्षिप्ता या सा तथा।

'उवट्ठाणसाला' उपवेशनमण्डपः। 'दुरुहइ' आरोहति। यत्रैव श्रमणो भगवान् तत्रैवोपागता–संप्राप्ता, तदनु महावीरं त्रिःकृत्वो वन्दते–स्तुत्या, नमस्यति–प्रणमति, स्थिता चैव ऊर्ध्वस्थानेन, कृताञ्जलिपुटा अभिसंमुखा सती पर्युपास्ते। धर्मकथाश्रवणानन्तरं 'त्रिःकृत्वो' वन्दयित्वा (वन्दित्वा) एवमवादीत्–'एवं खलु भंते' इत्यादि सुगमम्। अत्र कालीदेव्याः पुत्रः कालनामा कुमारो हस्तितुरगरथपदातिरूपनिजसैन्यपरिवृतः कूणिकराजनियुक्तश्चेटकराजेन सह रथमुशलं सङ्गामयन् सुभटैश्चेटकसत्कैर्यदस्य कृतं तदाह–'हयमहियपवरवीरघाइयनिवडियचिंधज्झयपडागे' (हतः) सैन्यस्य हतत्वात्, मथितो मानस्य मन्थनात्, प्रवरवीराः–सुभटा घातिताः–विनाशिता यस्य, तथा निपातिताश्चिह्नध्वजाः–गरुडादिचिह्नयुक्ताः केतवः पताकाश्च यस्य स तथा, ततः पदचतुष्टयस्य कर्मधारयः। अत एव 'निरालोयाओ दिसाओ करेमाणे' त्ति निर्गतालोका दिशः कुर्वन् चेटकराजः (स्य) 'सपक्खं सपडिदिसिं' ति सपक्षं–समानपार्श्वं समानवामेतरपार्श्वतया, सप्रतिदिक्–समानप्रतिदिक्तयाऽत्यर्थमभिमुख इत्यर्थः, अभिमुखागमने हि परस्परस्य समाविव दक्षिणवामपार्श्वौ भवतः, एवं विदिशावपीति।

इत्येवं स कालः चेटकराजस्य रथेन प्रतिरयं 'हव्वं' शीघ्रम् आसन्नं–संमुखीनम् आगच्छन्तं दृष्ट्वा चेटकराजः तं प्रति 'आसुरुत्ते' रुद्धे कुविए चंडिक्किए 'मिसिमिसेमाणे' त्ति, तत्र आशु–शीघ्रं रुष्टः–क्रोधेन विमोहितो यः स आशुरुष्टः, आसुरं वा–असुरसत्कं कोपेन दारुणत्वात् उक्तं–भणितं यस्य स आसुरोक्तः, रुष्टो–रोषवान् 'कुविए' त्ति मनसा कोपवान्, चाण्डिक्यितो–दारुणीभूतः 'मिसिमिसेमाणे' त्ति क्रोधज्वालया ज्वलन्, 'तिवलियं भिउडिं निडाले साहट्टु' त्ति त्रिवलिकां भृकुटिं–ललोचनविकारविशेषं ललाटे संहृत्य–विधाय, धनुः परामृशति, बाणं परामृशति, विशाखस्थानेन तिष्ठति, 'आययकण्णायतं' ति आकर्णान्तं बाणमाकृष्य' एगाहच्चं' ति एकयैवाहत्या आननंप्रहारो यत्र जीवितव्यपरोपणे तदेकाहत्यं यथा भवति एवं, कथमित्याह–'कूडाहच्चं' कूटस्येव–पाषाणमयमहामारणयन्त्रस्येव आहत्या आहननं यत्र तत्कूटाहत्यं, 'भगवतोक्तेयं व्याख्या,' 'अप्फुण्णा समाणी' व्याप्ता सती। शेषं सुगमं यावत्

*मू. (८) मंते त्ति भगवं गोयमे जाव वंदति नमंसति २ एवं वयासी–कालेण भंते! कुमारे तिहिं दंतिसहस्सेहिं जाव रहमुसलं संगामं संगामेमाणे चेडएणं रन्ना एगाहच्चं कूडाहच्चं जीवियाओ ववरोविते समाणे कालमासे कालं किच्चा कहिं गते? कहिं उववन्ने? गोयमाति समणे भगवं गोयमं एवं वदासि–एवं खलु गोयमा! काले कुमारे तिहिं दंतिसहस्सेहिं जाव जीवियाओ ववरोविते समाणे कालमासे कालं किच्चा चउत्थीए पंकप्पभाए पुढवीए हेमाभे नरगे दससागरोवमठिइएसु नेरइएसु नेरइयत्ताए उववन्ने।*

*मू. (९) कालेण भंते! कुमारे केरिसएहिं आरंभेहिं केरिसएहिं (समारंभेहिं केरिसएहिं) आरंभसमारंभेहिं केरिसएहिं भोगेहिं केरिसएहिं संभोगेहिं केरिसएहिं भोगसंभोगेहिं केरिसेण वा असुभकडकम्मपब्भारेणं कालमासे कालं किच्चा चउत्थीए पंकप्पभाए पुढवीए जाव नेरइयत्ताए उववन्ने? एवं खलु गोयमा! ते णं कालेणं तेण णं समएणं रायगिहे नामं नयरे होत्था, रिद्धत्थिमिसमिद्धा। तत्थ णं रायगिहे नयरे सेणिए नामं राया होत्था, महया। तस्स णं सेणियस्स रन्नो नंदा नामं देवी होत्था, सोमाला जाव विहरति।*

*तस्स णं सेणि यस्स रन्नो नंदाए देवीए अत्तए अभए नामं कुमारे होत्था, सोमाले जाव सुरूवे साम० दंडे जहा चित्तो जाव रज्जधुराए चिंतए यावि होत्था तस्स णं सेणियस्स रन्नो चेल्लणा नामं देवी होत्था, सुकुमाला जाव विहरइ।*

*मू. (१०) तते णं सा चिल्लणा देवी अन्नया कयाइं तंसि तारिसयंसि वासघरंसि जाव सीहं सुमिणे पासित्ता णं पडिबुद्धा, जहा पभावती, जाव सुमिणपाढगा पडिविसज्जिता, जाव चिल्लणा से वयणं पडिच्छित्ता जेणेव सए भवणे तेणेव अनुपविट्ठा। तते णं तीसे चेल्लणाए देवीए अन्नया कयाइं तिण्हं मासाणं बहुपडीपुण्णाणं अयमेयारूवे दोहले पाउब्भूए–धन्नाओ णं ताओ अम्मयाओ जाव अम्मजीवियफले जाओ णं सेणियस्स रन्नो उदरवलीमंसेहिं सोल्लेहि य तलिएहि य भज्जितेहि य सुरं च जाव पसन्नं च आसाएमाणीओ जाव परिभाएमाणीओ दोहलं पविणेंति।*

*तते णं सा चेल्लणा देवी तंसि दोहलंसि अविणिज्जमाणंसि सुक्का भुक्खा निम्मंसा ओलुग्गा ओलुग्गसरीरा नित्तेया दीनविमणवयणा पंडुइतमुही ओमंथियनयणवयणकमला जहोचियं पुप्फवत्थगंधमल्लालंकारं अपरिभुंजमाणी करतलमलियव्व कमलमाला ओहतमनसंकप्पा जाव झियायति। तते णं तीसे चेल्लणाए देवीए अंगपडिया रियातो चेल्लणं देविं सुक्कं भुक्खं जाव झियायमाणीं*

पासंति, पासित्ता जेणेव सेणिए राया तेणेव उवागच्छंति, २ करतलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु सेणियं रायं एवं वयासी–

एवं खलु सामी ! चेल्लणा देवी न याणामो केणइ कारणेणं सुक्का भुक्खा जाव झियायति तते णं से सेणिए राया तासिं अंतियं एयमट्ठं सोच्चा निसम्म तहेव संभंते समाणे जेणेव चेल्लणा देवी तेणेव उवागच्छइ २ चिल्लणं देविं सुक्कं भुक्खं जाव झियायमाणिं पासित्ता एवं वयासी–किन्नं तुमं देवाणुप्पिए ! सुक्का भुक्खा जाव झियायसि ? तते णं सा चेल्लणा देवी सेणियस्स रन्नो एयमट्ठं नो आढाति नो परिजाणाति तुसिणीया संचिट्ठति ।

तते णं से सेणिए राया चिल्लणं देविं दोच्चं पि तच्चंपि एवं वयासी–किं णं अहं देवाणुप्पिए ! एयमट्ठस्स नो अरिहे सवणयाए जं णं तुमं एयमट्ठं रहस्सीकरेसि ? तते णं सा चेल्लणा देवी सेणिएणं रन्ना दोच्चं पि तच्चं पि एवं वुत्ता समाणी सेणियं रायं एवं वयासी–नत्थि णं सामी ! से केति अट्ठे जस्स णं तुब्भे अणरिहा सवणयाए, नो चेव णं इमस्स अट्ठस्स सवणयाए, एवं खलु सामी ! ममं तस्स ओरालस्स जाव महासुमिणस्स तिण्हं मासाणं बहुपडिपुन्नाणं अयमेयारूवे दोहले पाउब्भूए धन्नातो णं तातो अम्मयाओ जाओ णं तुब्भं उदरवलिमंसेहिं सोल्लेएहिं य जाव दोहलं विणेंति ।

तते णं अहं सामी ! तंसि दोहलंसि अविणिज्जमाणी सुक्का भुक्खा जाव झियायामि । तते णं से सेणिए राया चेल्लणं देविं एवं वदासी–मा णं तुमं देवाणुप्पिए ! ओहय० जाव झियायहि, अहं णं तहा जतिहामि जहा णं तव दोहलस्स संपत्ती भविस्सतीतिकट्टु चिल्लणं देविं ताहिं इट्ठाहिं कंताहिं पियाहिं मणुन्नाहिं मणामाहिं ओरालाहिं कल्लाणाहिं सिवाहिं धन्नाहिं मंगल्लाहिं मियमधुरससिरीयाहिं वग्गूहिं समासासेति, चिल्लणाए देवीए अंतियातो पडिनिक्खमति २ जेणेव बाहिरिया उवट्ठाणसाला जेणेव सीहासणे तेणेव उवागच्छइ, उवागच्छित्ता सीहासणवरंसि पुरत्थाभिमुहे निसीयति, तस्स दोहलस्स संपत्तिनिमित्तं बहूहिं आएहि उवाएहि य उप्पत्तियाए य वेणइयाए य कम्मियाहि य पारिणामियाहि य परिणामेमाणे २ तस्स दोहलस्स आयं वा उवायं वा ठिइं वा अविंदमाणे ओहयमनसंकप्पे जाव झियायति ।

